# 11. पर्यावरणम्

**अभ्यासः**

**प्रश्नः 1. एकपदेन उत्तरं लिखत**
(क) मानवः कुत्र सुरक्षितः तिष्ठति?
(ख) सुरक्षितं पर्यावरणं कुत्र उपलभ्यते स्म?
(ग) आर्षवचनं किमस्ति?
(घ) पर्यावरणमपि कस्य अङ्गमिति ऋषयः प्रतिपादितवन्तः?
(ङ) लोकरक्षा कया सम्भवति?
(च) अजातशिशुः कुत्र सुरक्षितः तिष्ठति?
(छ) प्रकृतिः केषां संरक्षणाय यतते?

**उत्तरः**
(क) पर्यावरणकुक्षौ
(ख) वने
(ग) धर्मो रक्षति रक्षितः
(घ) धर्मस्य
(ङ) प्रकृतिरक्षया
(च) मातृगर्भ
(छ) प्राणिनाम्

**प्रश्नः 2. अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत**
(क) प्रकृतेः प्रमुखतत्त्वानि कानि सन्ति?
(ख) स्वार्थान्धः मानवः किं करोति?
(ग) पर्यावरणे विकृते जाते किं भवति?
(घ) अस्माभिः पर्यावरणस्य रक्षा कथं करणीया?
(ङ) लोकरक्षा कथं संभवति?
(च) परिष्कृतं पर्यावरणम् अस्मभ्यं किं किं ददाति?

**उत्तरः**
(क) पृथ्वी, जलं तेजः, वायुः आकाशः च प्रकृतेः प्रमुखतत्त्वानि सन्ति।
(ख) स्वार्थान्धः मानवः पर्यावरणम् नाशयति।
(ग) पर्यावरणे विकृते जाते विविधाः रोगाः भीषणसमस्याः च जायन्ते।
(घ) वृक्षारोपणम् कृत्वा, विषाक्तं जलं नद्याम् न पातथित्वा ध्वनिप्रदूषणं च न कृत्वा अस्माभिः पर्यावरणस्य .. रक्षा करणीया।।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ङ) प्रकृतिरक्षया एव लोकरक्षा संभवति।
(च) परिष्कृतम् पर्यावरणम् अस्मभ्यं सांसारिक जीवनसुखं, सद्विचार, सत्यसङ्कल्पं माङ्गलिकसामग्री च ददाति।

**प्रश्न: 3. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत**
(क) वनवृक्षाः निर्विवेकं छिद्यन्ते।
(ख) वृक्षकर्तनात् शुद्धवायुः न प्राप्यते।
(ग) प्रकृतिः जीवनसुखं प्रददाति।
(घ) अजातश्शिशुः मातृगर्भे सुरक्षितः तिष्ठति।
(ङ) पर्यावरणरक्षणं धर्मस्य अङ्गम् अस्ति।

**उत्तर:**
(क) के निर्विवेकं छिद्यन्ते?
(ख) कस्मात् शुद्धवायुः न प्राप्यते?
(ग) प्रकृतिः किम् प्रददाति?
(घ) अजातश्शिशुः कस्मिन् सुरक्षितः तिष्ठति?
(ङ) पर्यावरणरक्षणं कस्य अङ्गम् अस्ति?

**प्रश्नः 4. उदाहरणमनुसृत्य पदरचनां कुरुत**
(क) यथा- जले चरन्ति इति – जलचराः
स्थले चरन्ति इति – ..........
निशायां चरन्ति इति – ..........
व्योम्नि चरन्ति इति – ..........
गिरौ चरन्ति इति – ..........
भूमौ चरन्ति इति – ..........

**उत्तर:**
स्थले चरन्ति इति – स्थलचराः
निशायां चरन्ति इति – निशाचराः
व्योम्नि चरन्ति इति – व्योमचराः
गिरौ चरन्ति इति – गिरिचराः
भूमौ चरन्ति इति – भूचराः

**(ख) यथा- न पेयम् इति – अपेयम्**
न वृष्टि इति – ..........
न सुखम् इति – ..........
न भावः इति – ..........

Get More Learning Materials Here : CLICK HERE www.studentbro.in

न पूर्णः इति – ..........

**उत्तर:**
न वृष्टि इति – अनावृष्टि
न सुखम् इति – असुखम्
न भावः इति – अभावः
न पूर्णः इति – अपूर्णः

**प्रश्नः 5. उदाहरणमनुसृत्य पदनिर्माणं कुरुत**
यथा- वि + कृ + क्तिन् = विकृतिः
(क) प्र + गम् + क्तिन् = ...........
(ख) दृश् + क्तिन् = ...........
(ग) गम् + क्तिन् = ...........
(घ) मन् + क्तिन् = ...........
(ङ) शम् + क्तिन् = ...........
(च) भी + क्तिन् = ...........
(छ) जन् + क्तिन् = ...........
(ज) भज् + क्तिन् = ...........
(झ) नी + क्तिन् = ...........

**उत्तर:**
प्र + गम् + क्तिन् = प्रगति:
दृश् + क्तिन् = दृष्टि:
गम् + क्तिन् = गति:
मन् + क्तिन् = मतिः
शम् + क्तिन् = शान्तिः
भी + क्तिन् = भीतिः
जन् + क्तिन् = जातिः
भज् + क्तिन् = भक्तिः
नी + क्तिन् = नीतिः

**प्रश्नः 6. निर्देशानुसारं परिवर्तयत यथा- स्वार्थान्धो मानवः अद्य पर्यावरणं नाशयति (बहुवचने)।**
स्वार्थान्धाः मानवाः अद्य पर्यावरणं नाशयन्ति।
(क) सन्तप्तस्य मानवस्य मङ्गलं कुतः? (बहुवचने)
(ख) मानवाः पर्यावरणकुक्षौ सुरक्षिताः भवन्ति। (एकवचने)
(ग) वनवृक्षाः निर्विवेकं छिद्यन्ते। (एकवचने)

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) गिरिनिर्झराः निर्मलं जलं प्रयच्छन्ति। (द्विवचने)
(ङ) सरित् निर्मलं जलं प्रयच्छति। (बहुवचने)

**उत्तर:**
(क) सन्तप्तानाम मानवानाम मङ्गलं कतः?
(ख) मानवः पर्यावरणकुक्षौ सुरक्षितः भवति।
(ग) वनवृक्षः निर्विवेकम् छिद्यते।
(घ) गिरिनिर्झरौ निर्मलं जलं प्रयच्छतः।
(ङ) सरितः निर्मलं जलं प्रयच्छन्ति।

**(अ) पर्यावरणरक्षणाय भवन्तः किं करिष्यन्ति इति विषये पञ्च वाक्यानि लिखत। यथा- अहं विषाक्तम् अवकरं नदीषु न पातयिष्यामि।**
(क) ...............
(ख) ...............
(ग) ...............
(घ) ...............
(ङ) ...............

**उत्तर:**
(क) अहम् पर्यावरणरक्षणाय कृतसंकल्पः अस्मि।
(ख) एतर्थं स्थाने स्थाने वृक्षाः रोपणीयाः।
(ग) वृक्षकर्तनं रोद्धव्यम्।
(घ) 'जलम् एव जीवनम्' अतः जलसंरक्षणम् अपि कर्त्तव्यम्।
(ङ) पर्यावरणरक्षणाय जनजागरणम् अपि करणीयम्।

**प्रश्नः 7. उदाहरणमनुसृत्य उपसर्गान् पृथक्कृत्वा लिखत यथा- संरक्षणाय**

**उत्तर:**

| | | | | |
|---|---|---|---|---|
| यथा– संरक्षणाय | – | सम् | | उत्तरम् |
| (*i*) प्रभवति | – | ............. | – | प्र |
| (*ii*) उपलभ्यते | – | ............. | – | उप |
| (*iii*) निवसन्ति | – | ............. | – | नि |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | | | |
|---|---|---|---|---|
| (*iv*) समुपहरन्ति | – | .............. | – | सम् |
| (*v*) वितरन्ति | – | .............. | – | वि |
| (*vi*) प्रयच्छन्ति | – | .............. | – | प्र |
| (*vii*) उपगता | – | .............. | – | उप |
| (*viii*) प्रतिभाति | – | .............. | – | प्रति |

**(अ) उदाहरणमनुसृत्य अधोलिखितानां समस्तपदानां विग्रहं लिखत**
यथा- तेजोवायुः – तेजः वायुः च।
गिरिनिर्झराः – गिरयः निर्झराः च।
(i) पत्रपुष्पे — ...............
(ii) लतावृक्षौ — ...............
(iii) पशुपक्षी — ...............
(iv) कीटपतङ्गौ — ...............

**उत्तर:**
(i) पत्रम् च पुष्पम् च
(ii) लता च वृक्षः च
(iii) पशुः च पक्षी च
(iv) कीटः च पतङ्गः च

## परियोजनाकार्यम्

**(क)** विद्यालयप्राङ्गणे स्थितस्य उद्यानस्य वृक्षाः पादपाश्च कथं सुरक्षिताः स्युः तदर्थं प्रयत्नः करणीयः इति सप्तवाक्येषु लिखत।

**(ख)** अभिभावकस्य शिक्षकस्य वा सहयोगेन एकस्य वृक्षस्य आरोपणं करणीयम्। (यदि स्थानम् अस्ति।) तर्हि विद्यालय-प्राङ्गणे, नास्ति चेत् स्वस्मिन प्रतिवेशे, गहे वा।) कृतं सर्वं दैनन्दिन्यां लिखित्वा शिक्षकं दर्शयत।

**उत्तर:**

**(क)**
(i) विद्यालयप्राङ्गणे स्थितस्य उद्यानस्य वृक्षाः पादपाः च अस्माभिः सुरक्षिताः स्युः।
(ii) विद्यालयस्य प्राङ्गणे फलदायकाः उपयोगिनः च वृक्षाः पादपाः च रोपणीयाः।
(iii) छात्रैः रोपिताः वृक्षाः पादपाः च प्रतिदिनं जलेन सिञ्चिताः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(iv) छात्रैः वृक्षाः पादपाः च स्वमित्रवत् स्नेहन रक्षितव्याः।
(v) कोऽपि पशुः तान् न नाशयितुम् समर्थः भवेत्।
(vi) यथासमये उर्वरकपदार्थानाम् प्रयोगः अपि करणीयः।
(vii) ध्यातव्यम् यत् कोऽपि वृक्षच्छेदनं कर्तुम् समर्थः न भवेत्।

**(ख)** यह प्रेक्टिकल (क्रियात्मक) है। छात्रों से वृक्षारोपण करवाना

Get More Learning Materials Here : CLICK HERE www.studentbro.in